संस्कृत वार्ताः

16.10.2024

सायं - 06:20

<u>मुख्यवार्ताः</u>

· केन्द्र प्रशासनेन आगामि विपणन-सत्राय शीतकालिक-सस्यानां एम. एस. पी. इति न्यूनतम-समर्थन-मूल्ये वृद्धिः कृतास्ति।

· विदेशमन्त्री डॉ. एस् जयशङ्करः उक्तवान् यत् सीम्नि प्रचल्यमानाः आतङ्कवाद-उग्रवाद-पृथक्कवाद-गतिविधयः व्यापारं जनानां मध्ये सम्पर्कं च अवरोधयन्ति।

· नैशनल कॉन्फ्रेंस दलस्य नेता उमर अब्दुल्लाह् अद्य जम्मू-कश्मीरस्य केन्द्रशसित-प्रदेशस्य मुख्यमन्त्रिणः शपथग्रहणं कृतवान्।

· सर्वोच्च-न्यायालयेन धान्यापशिष्ट-दहन-कारणेन जायमानं वायु प्रदूषणं निध्याय हरियाणा-पञ्जाब-प्रशासने आलोचिते।

· भारतस्य अखिल-श्योरनः अद्य आई.एस.एस.एफ. विश्व-लक्ष्यवेध-चषक-स्पर्धायां पञ्चाशत् मीटर राईफल् 3पी. इति श्रेण्यां कास्यपदकं विजितवान्।

<u>मन्त्रिमण्डलनिर्णयः</u>

केन्द्र-प्रशासनेन आगामि विपणन-सत्राय शीतकालिक-सस्यानां एम. एस. पी. इति न्यूनतम-समर्थन-मूल्ये वृद्धिः कृतास्ति। प्रधानमन्त्रिणः नरेन्द्र मोदिनः अध्यक्षतायां मन्त्रिमण्डलस्य उपवेशनम् अभवत्। उपवेशनस्य अनन्तरं सूचना प्रसारणमनत्री अश्विनी वैष्णवः वार्ताहरान् मन्त्रि-मण्डलस्य निर्णयानां विवरणम् अयच्छत्।

## राष्ट्रपतिभ्रमण- मॉरिटानिया :

राष्ट्रपतिः द्रौपदी मुर्मु अद्य स्वीय यात्रायाः द्वितीये चरणे अल्जीरियादेशस्य यात्रायाः समापनानन्तरं मॉरिटानिया-देशं प्राप्तवती। राष्ट्रपतिः मुर्मु: स्वीय मॉरिटानिया-देशस्य समकक्षेण मोहम्मद औलद गजौनी इत्यनेन सह अन्यैः नेतृभिः च सह द्विपक्षीयोपवेशनं करिष्यति। राष्ट्रपति: मुर्मु: मॉरिटानियादेशे भारतीयप्रवासीभिः सह अपि संवादं करिष्यति। विदेशमन्त्रालयेन उक्तं यत् राष्ट्रपतिः अल्जीरिया, मॉरिटानिया, मलावी त्रयाणां देशानां यात्रायाम् अस्ति। यत्रायाः तृतीये चरणे राष्ट्रपतिः श्वः मलावीदेशं गमिष्यति। एतेषाम् राष्ट्राणाम् भ्रमणम् आफ्रिका देशैः सह भारतस्य सम्बन्धं सुदृढं विस्तृतं च कर्तुम् अस्ति।

## विदेशमन्त्री

विदेशमन्त्री डॉ. एस् जयशङ्कर: उक्तवान् यत् अर्थव्यवस्था-विकासयो कृते शान्ति: स्थिरता च आवश्के स्त:। अनेन प्रत्यादिष्टं यत् सीम्नि प्रचल्यमाना: आतङ्कवाद-उग्रवाद-पृथक्कवाद-गतिविधय: व्यापारं जनानां मध्ये संवर्धमान-सम्पर्कं च अवरोधयन्ति। अद्य पाकिस्तानदेशस्य इस्लामाबादनगरे शङ्घाई-सहयोग-सङ्घटनस्य शासनाध्यक्षाणां परिषद: त्रयोविंशतितमम् उपवेशनं सम्बोधयन् असौ वार्ताम् इमाम् प्रकटितवान्। विदेशमन्त्रिणा अग्रे समुदीरितं यत् ऋतुदशाया: प्रतिकूल-परिस्थितय: आपूर्ति-श्रृङ्खलानाम् अनिश्चितता: वित्तीय अनियन्त्रणं च समग्रविश्वं पूर्वमेव प्रभावयन्ति। असौ पुन: प्रावोचत् यत् देशयोर्मध्ये सहयोग: पारस्परिक-सम्मान-सम्प्रभुता-भौगोलिक-अखण्डतायाश्च मान्यतायाम् आधारितो भवेदिति। श्रीजयशङ्कर: शङ्घाई-सहयोग-सङ्घटन-व्यवस्थायाम् भारतेन विहित-प्रयासानां महत्त्वमपि प्रतिपादितवान्।

## सर्वोच्च न्यायालय:

सर्वोच्च-न्यायालयेन धान्यापशिष्ट-दहन-कारणेन जायमानं वायु-प्रदूषणं निध्याय हरियाणा-पञ्जाब-प्रशासने आलोचिते। न्यायमूर्ते: अभय एस. ओका इत्यस्य पीठेन अद्य वायु-गुणवत्ता-प्रबन्धनायोग: उल्लङ्घन कर्तृण: विरुध्य कार्याचरणे असमर्थान् हरियाणा-पञ्जाबयो: प्रशासनाधिकारिण: विरुध्य दण्डात्मक-कार्याचरणस्य निर्देश: प्रदत्त:। न्यायालयेन उल्लङ्घनकर्तृण: विरुध्य कार्याचरणाय साप्ताहिकावधि: प्रदत्ता। सममेव हरियाणाया: पञ्जाबयो: मुख्य-सचिवाभ्यां समनपत्रं प्रेषितम्। यस्मिन् ऑक्टूबर त्रयोविंश्यां न्यायालये उपस्थातुं निर्देश: प्रदत्त:।

## जम्मू-कश्मीर शपथग्रहणम् :

नैशनल कॉन्फ्रेंस दलस्य नेता उमर अब्दुल्लाह अद्य जम्मू-कश्मीरस्य केन्द्रशसित-प्रदेशस्य मुख्यमन्त्रिणः शपथग्रहणं कृतवान्। उपराज्यपालः मनोजसिन्हा श्रीनगरस्य शेर-ए-कश्मीर-अन्ताराष्ट्रिय-सम्मेलन-केन्द्रे प्रातः सार्ध एकादश वादने उमर अब्दुल्लाह इत्यस्मै मन्त्रिपरिषदा सह शपथं प्रतिज्ञपितवान् । नेशनल कॉन्फ्रेंस दलस्य वरिष्ठो नेता सुरिंदर चौधरी उपमुख्यमन्त्री पदस्य सकीना इटू, जावेद-राणा, जावेद-डार, सतीश-शर्मा च मन्त्री रूपेण शपथं स्वीकृतवन्त:। अत्रावसरे कांग्रेस अध्यक्षः मल्लिकार्जुन खरगे, लोकसभायां विपक्षस्य नेता राहुल-गांधी, सपा-दलाध्यक्षः अखिलेश-यादवः जम्मू-कश्मीरस्य पूर्व-मुख्यमन्त्री महबूबा मुफ्ती भाजपादलस्य नेतारः अपि शपथ-ग्रहण-समारोहे सम्मिलिताः अभवन्।

## प्रधानमन्त्री-उमर अब्दुल्ला:

प्रधानमन्त्री नरेन्द्रमोदी जम्मूकश्मीरस्य नवनिर्वाचिताय मुख्यमन्त्रिणे उमर-अब्दुल्ला-इत्यस्मै शुभकामना: अयच्छत्। अद्य एकस्मिन् सामाजिक-सञ्चार-पटले प्रधानमन्त्रिणा जनानां कृते विहित-प्रयासेभ्य: उमर-अब्दुल्ला-इत्यस्मै शुभकामना: प्रदत्ता:। प्रधानमन्त्री अग्रे प्रोक्तवान् यत् केन्द्रप्रशासनं जम्मू-कश्मीरस्य प्रगतये श्रीअब्दुल्ला-इत्यमुना सह मिलित्वा कार्यम् आचरिष्यति।

## हरियाणायां शपथग्रहणम्

हरियाणायाः कार्यवाहक-मुख्यमन्त्री नायब-सिंह-सैनी विधायक-दलस्य नेता चितः। वरिष्ठ-विधायकाभ्याम् अनिल-विज कृष्ण-कुमार-बेदी इत्येताभ्यां मुख्यमन्त्रित्वेन नायब-सिंह-सैनी इत्यस्य नाम प्रस्तावितः। भाजपा दलेन विधानसभा-निर्वाचने नायब-सिंह-सैनी इत्यसौ मुख्यमन्त्रि-प्रत्याशित्वेन घोषितः । भाजपा दलस्य हरियाणा-पर्यवेक्षकेन केन्द्रीय-गृहमन्त्रिणा अमितशाहेन अद्य पञ्चकुलायां भाजपाकार्यालये विधायक-दलस्य उपवेशनानन्तरम् एतत् उद्घोषितम्।

नायबसिहंसैनी भाजपा-विधायक-दलेन सह राज्यपालेन बंडारू- दत्तात्रेय इत्यनेन सह मिलित्वा राज्ये प्रशासन-विरचनस्य प्रस्तावम् उपस्थापयिष्यति। शपथ-ग्रहण-समारोहः श्वः पञ्चकुलायाः शालीमार-प्राङ्गणे आयोजयिष्यते ।

## वित्तमन्त्री विदेशयात्रायाम्

केन्द्रीय-वित्त-मन्त्री निर्मला सीतारमणः अद्य मेक्सिको अमेरिका देशयोः यात्रार्थं गमिष्यति। यात्रायाः प्रथम-चरणे अस्य मासस्य सप्तदश दिनात् विंशतिः दिनाङ्कं यावत् वित्तमन्त्री मेक्सिको देशस्य 'सिलिकॉन वैली' इत्यत्र टेक लीडर्स राउंड टेबल इति सम्मेलनस्य अध्यक्षतां करिष्यति। श्रीमती सीतारमणः मेक्सिको देशस्य वित्त-मन्त्रिणा रोजेलियो रामिरेज़ डे ला ओ इत्यनेन सह द्विपक्षीयोपवेशनमपि करिष्यति। वित्तमन्त्री निर्मला-सीतारमणः संसदीय-सहयोगं वर्धितुम् आर्थिक-विकासं च समेधितुं मैक्सिको-देशस्य संसत्-सदस्यैः सह चर्चा अपि करिष्यति। मेक्सिको नगरे श्रीमती सीतारमणः भारत-मेक्सिको व्यापार-निवेश-शिखर-सम्मेलने मुख्योद्बोधनं प्रदास्यति। अस्मिन् आयोजने देश-द्वयस्य प्रमुखोद्योगपतयः सहभागं करिष्यन्ति। वित्तमन्त्री भारतीय-प्रवासिनाम् एकस्मिन् सामुदायिक-कार्यक्रमे अपि भागं भजिष्यति। यात्रायाः द्वितीये चरणे श्रीमती सीतारमणः अस्य मासस्य विंशतिः दिनात् षड् विंशतिः दिनाङ्कं यावत् अमेरिकायाः यात्रायां भविष्यति। तत्र सा अन्ताराष्ट्रिय-मुद्रा-कोषस्य विश्व-बैङ्कस्य च वार्षिकोपवेशनम् अतिरिच्य G-विंशतिः देशानां वित्त-मन्त्रिणाम् केन्द्रीय-बैङ्क- गवर्नर-एफ.एम.सी.बी.जी. इत्यस्य च उपवेशने स्थास्यति।

## केन्द्रीयसञ्चारमन्त्री

केन्द्रीय-सञ्चारमन्त्री ज्योतिरादित्य-सिन्धिया अद्य अकथयत् यत् सकल-विश्वस्य समग्रस्य आङ्ककीय-विनिमयस्य षड्-चत्वारिंशत्प्रतिशतं अंशा: भारते भवन्तीति। अद्य नवदिल्लयां भारत-मण्डप-स्थानके अन्ताराष्ट्रिय-सिक्सजी-इत्येतस्य सम्मेलनस्य औद्घाटनिकं सत्रं सम्बोधयन् श्रीसिन्धिया अवोचत् यत् अस्य वर्षस्य अगस्तमासे भूयोऽपि द्वि-अर्बुद-डॉलर-मितस्य विनिमयं सार्धैकार्बुद-यूपीआई माध्यमेन विहितम् तदर्थं प्रत्येकस्मै नागरिकाय अन्तर्जालिक-सुरक्षा निश्चिता भवितव्या इति।

## लक्ष्यवेध-स्पर्धा

भारतस्य अखिल-श्योरनः अद्य आई.एस.एस.एफ. विश्व-लक्ष्यवेध-चषक-स्पर्धायां पञ्चाशत् मीटर राईफल् 3पी. इति श्रेण्यां कास्यपदकं विजितवान्। नवदिल्याम् आयोज्यमानां शृङ्खलायाम् एतत् हि भारतस्य द्वितीयं पदकं वर्तते।

## क्रिकेट्

भारत-न्यूजीलैण्डदेशयोः क्रिकेट्-निकष-शृङ्खलायाः प्रथमा-स्पर्धा अद्य नैव-आरब्धा। वर्षा कारणेन प्रथमे दिने क्रीडा स्थगिता।

।।इति वार्ता:।।